श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्वाल्मीकीये श्रीमदानन्दरामायणे सारकाण्डे

# ॥ श्रीरामाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामाष्टकम् ॥

श्रीशिव उवाच

सुग्रीवमित्रं परमं पवित्रं
    सीताकलत्रं नवमेघगात्रम्।
कारुण्यपात्रं शतपत्रनेत्रं
    श्रीरामचन्द्रं सततं नमामि ॥ 1 ॥

संसारसारं निगमप्रचारं
    धर्मावतारं हृतभूमिभारम्।
सदाऽविकारं सुखसिन्धुसारं
    श्रीरामचन्द्रं सततं नमामि ॥ 2 ॥

लक्ष्मीविलासं जगतां निवासं
    लङ्काविनाशं भुवनप्रकाशम्।
भूदेववासं शरदिन्दुहासं
    श्रीरामचन्द्रं सततं नमामि ॥ 3 ॥

मन्दारमालं वचने रसालं
    गुणैर्विशालं हतसप्ततालम्।
क्रव्यादकालं सुरलोकपालं
    श्रीरामचन्द्रं सततं नमामि ॥ 4 ॥

वेदान्तगानं सकलैः समानं
    हतारिमानं त्रिदशप्रधानम्।

गजेन्द्रयानं विगतावसानं
श्रीरामचन्द्रं सततं नमामि ॥ 5 ॥

श्यामाभिरामं नयनाभिरामं
गुणाभिरामं वचनाभिरामम् ।
विश्वप्रणामं कृतभक्तकामं
श्रीरामचन्द्रं सततं नमामि ॥ 6 ॥

लीलाशरीरं रणरङ्गधीरं
विश्वैकसारं रघुवंशहारम् ।
गम्भीरनादं जितसर्ववादं
श्रीरामचन्द्रं सततं नमामि ॥ 7 ॥

खले कृतान्तं स्वजने विनीतं
सामोपगीतं मनसा प्रतीतम् ।
रागेण गीतं वचनादतीतं
श्रीरामचन्द्रं सततं नमामि ॥ 8 ॥

श्रीरामचन्द्रस्य वराष्टकं त्वां
मयेरितं देवि मनोहरं ये ।
पठन्ति शृण्वन्ति गृणन्ति भक्त्या
ते स्वीयकामान् प्रलभन्ति नित्यम् ॥ 9 ॥

॥ श्रीरामाष्टकं समाप्तम् ॥